॥इतिशिक्षाचतुष्टयप्रारंभः॥
श्री

श्रीगणेशायनमः॥ ॐ॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा॥ शास्त्रानुपूर्वंतद्विद्याद्यथोक्तं
कर्मवेदयोः॥ प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः॥ पुनर्व्यक्तीकरिष्यामिवाङ्मयोच्चारणोविधिं॥ त्रि
षष्टिश्चतुःषष्टिर्वर्णाःशंभुमतेमताः॥ प्राकृतेसंस्कृतेचापि स्वयंप्रोक्तास्वयंभुवा॥ स्वराविंशति
रेकश्चस्पर्शानांपंचविंशतिः॥ यादयश्चस्मृताग्रेष्टौचत्वारश्चयमास्मृताः॥ अनुस्वारोविसर्गश्च
कःपौचापिपराश्रितौ॥ दुस्पृष्टश्चेतिविज्ञेयोलृकारःप्लुतएवच॥१॥ आत्माबुध्यासमेत्यार्थान्मनो
युंक्तेविवक्षया॥ मनःकायाग्निमाहंतिसप्रेरयतिमारुतं॥ मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं॥
प्रातःसवनयोगंतंछंदोगायत्रमाश्रितं॥ कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं॥ तारंतार्तीयस
वनंशीर्षण्यंजागतानुगं॥ सोदीर्णोमूर्ध्नभिहतोवक्त्रमापद्यमारुतः॥ वर्णांजनयतेतेषांविभागः
पंचधास्मृतः॥ स्वरतःकालतःस्थानात्प्रयत्नानुप्रदानतः॥ इतिवर्णविदः प्राहुर्निपुणंतंनिबोधत॥२॥

उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः॥ ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअचि॥ उच्चैरो
दात्तगांधारावनुदात्तऋषभधैवतौ॥ स्वरितप्रभवावेतेषड्जमध्यमपंचमाः॥ अष्टौस्थानानि
वर्णानामुरःकंठश्चमूर्धस्तथा॥ जिह्वामूलंचदंताश्चनासिकोष्ठौचतालुच॥ ओंभावश्चविसर्गश्च
जिह्वामूलमुपध्मानीयगतिरष्टविधोष्मणः॥ यमोभावप्रसंधानमुकारादि
परंपदं॥ स्वरांतंतादृगंविद्याद्यदन्यच्चक्रमूष्मणः॥३॥ हकारंपंचमेयुंक्तमंतस्थाभिश्चसंयुतं॥
औरस्यंतंविजानीयात्कंठ्यमाङ्रसंयुतं॥ कंठ्याबलाविचुयशास्तालव्याओष्ठजावुपू॥ स्युर्मु
र्धन्याऋटुरषादंत्यास्तृतुलसास्मृताः॥ जिह्वामूलेतुकुःप्राक्तोदंत्योष्ठ्यौवस्मृतौबुधैः॥ एतेतु
कंठतालव्याओऔकंठौष्ठजौस्मृतौ॥ अर्धमात्रातुकंठ्यास्यादेकारैकारयोर्भवेत्॥ ओकारौ
कारयोर्मात्रातयोर्विवृतसंवृतं॥ संवृतंमात्रकंज्ञेयंविवृतंतुद्विमात्रिकं॥ घोषावासंवृताः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सर्वेअघोषाविवृतास्मृताः॥४॥ स्वराणामूष्मणांचैवविवृतंकरणंस्मृतं॥तेभ्योपिविवृतावेज्ञेताभ्या
॥२॥ मेचौतथैवच॥अनुस्वारयमाणांचनासिकास्थानमुच्यते॥अयोगवाहाविज्ञेयाआश्रयस्थान
भागिनः॥अलाबुवीणानिर्घोषोदंश्यमूल्यस्वराननु॥अनुस्वारस्तुकर्तव्योनियंक्रोःराषसेषुच॥
अनुस्वारेविवृत्यांतुविरामेचाक्षरद्वये॥हूरोस्योतुविवृत्तीयाघ्रांकारवकारयोः॥व्याघ्री
यथाहरेत्सुतांदंष्ट्राभ्यांनचपीडयेत्॥भीतापतनभेदाभ्यांतद्वदूर्णांप्रयोजयेत्॥५॥यथास्त्री
राष्ट्रिकानारीतत्रैरस्यभिभाषते॥एवंरंगाः प्रयोक्तव्याःखेअर्द्धस्वरवेदया॥रंगवर्णप्रयुंजी
रंनोष्ठसेसूर्वमक्षरं॥हीर्घस्वरंप्रयुंजीयात्स्थानानासिक्यमाचरेत्॥हृदयेचैकमात्रस्तुद्वि
त्रस्तूर्ध्वनि॥नासिकायांतथार्धंचरंगस्यैवंहिमात्रितं॥हृदयादुत्करेतिष्ठन्कांस्येनसम
नुस्वरम्॥मार्दवंचहिमात्रंचमधुर्वाक्षितिनिदर्शनं॥मध्येतुकंपयेत्कंपमुभोपार्श्वैसमोभवेत्॥

सरंगंकंपयेत्कंपंरथीवेतिनिदर्शनं॥एवंवर्णाः प्रयोक्तव्यानाव्यक्तानचपीडिताः॥सम्यग्वर्णप्रयोगेण
ब्रह्मलोकेमहीयते॥६॥गीतीशीघ्रीशिरःकंपीतथालिखितपाठकः॥अनर्थज्ञोल्पकंठश्चषडेतेपाठका
धमाः॥माधुर्यमक्षरव्यक्तिःपदच्छेदस्तुसुस्वरः॥धैर्यलयसमर्थंचषडेतेपाठकागुणाः॥शंकितंभी
तमुद्घुष्टमव्यक्तमनुनासिकं॥काकस्वरंशिरसिगतंतथास्थानविवर्जितं॥उपांशुदष्टंत्वरितंनिरस्तं
विलंबितंगद्गदितंप्रगीतं॥निष्पीडितंयस्तपदाक्षरंचबद्धेन्दीनंननुसानुनास्यं॥प्रातःपठेन्नित्य
मुरास्थितेनस्वरेणाशार्दूलप्लुतोपमेन॥मध्यंदिनेकंठगतेनचैवचक्रौंचसंकूजितसन्निभेन॥ता
रंतुविद्यात्सवनंतृतीयंशिरोगतंतच्चसदाप्रयोज्यं॥मयूरहंसान्यभृतःस्वराणांतुल्येननादेनशि
रास्थितेन॥७॥अन्तःस्पृष्टायणस्त्रीषंनेमिस्पृष्टाःशरस्मृताः॥शेषास्पृष्टाहलःप्रोक्तानिबोधा

नुप्रदानतः॥ ममोनुनासिकानकोनादिनोहसघस्मृतः॥ईषंनादायणंजश्वश्वासिनस्कखफादयः॥
॥३१॥ ईषच्छ्वासोश्वरोविघाकोर्धमैतत्प्रचक्षते॥ दाक्षीपुत्रः पाणिनायेनेदंव्याप्तंभुवि॥ छंदःपा
दौतुवेदस्यहस्तोकल्पोथपठ्यते॥ ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते॥ शिक्षाघ्राणंतुवेदस्य
मुखंव्याकरणंस्मृतं॥ तस्मात्सांगमधीत्येवब्रह्मलोकेमहीयते॥८॥उदात्तमाख्यातिरघोगुदी
नांप्रदेशिनीमूर्ध्निविष्टमूर्ध्वा॥ उपांतमध्येस्वरितंधत्तेचकनिष्किकायामनुदात्तमेव॥ उदात्तं
प्रदेशिनीविघात्प्रचयंमध्यतोगुलिं॥ निहतंतुकनिष्किक्यांस्वरितोपकनिष्किकां॥ अंतोदात्तमा
द्युदात्तमुदात्तमनुदात्तंनीचस्वरितं॥ मध्योदात्तंस्वरितमुदात्तंद्युदात्तमितिनवपदशय्या॥अ
ग्निःसोमःप्रजापतीर्यंहविषांस्वर्बृहस्पतिरिंद्रोबृहस्पती॥ अग्निरित्यंतोदात्तंसोम इत्याद्युदा ॥३॥
त्तंप्रत्यादात्तंवरुणनुदात्तंवीर्यंत्रैत्रचस्वरितं॥ हविषांमध्योदात्तंस्वरितिस्वरितं॥बृहस्पतिरि

तिद्युदात्तमिंद्रबृहस्पतिरितिद्युदात्तं॥ अनुदात्तोहृदिस्थोमूर्ध्युदात्तउदाहृतः॥ स्वरितःकर्ण
मूलीयःसर्वास्येप्रचयःस्मृतः॥९॥ चाषस्तूवदतेमात्रांद्विमात्रंत्वेववायसः॥ शिखीरौतित्रि
मात्रंतुनकुलैस्त्वर्धमात्रकं॥ कुतीर्थादागतंदग्धमपवर्णंचभक्षितं॥ नतस्यपाठेमोक्षो
स्तिपापाद्धेरिवकिल्बिषात्॥ सुतीर्थादागतंयत्नंस्वाम्नाय्यसुव्यवस्थितं॥ सुस्वरेणसुवर्णे
पाप्रयुक्तंब्रह्मराजते॥ मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह॥ सवा
ग्वज्रोयजमानोहिनस्तियथेंद्रशत्रुःस्वरतोपराधात्॥ अक्षरंहनाशुष्यंविस्वरंव्याधि
पीडितं॥ अक्षताशास्त्ररूपेपावज्रंपततिमस्तके॥ हस्तहीनंतुयोधीतेस्वरवर्णविवर्जि
तं॥ ऋग्यजुःसामभिर्दग्धोविद्योनिमपिगच्छति॥ हस्तेनवेदंयोधीतेस्वरवर्णार्थसंयु

तं॥ ऋग्यजुः सामभिः पूतो ब्रह्मलोके महीयते॥ १०॥ शंकरः शांकरीप्रादाद्दासीपुत्रायधीमते॥ वाङ्मयेभ्यः समाहृत्य देवी वाचमिति स्थितिः॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥ कृत्स्नं व्याकरणंप्रोक्तं तस्मैपाणिनयेनमः॥ येनधौतागिरः पुंसांविमलैः शब्दवारिभिः॥ तमश्चाज्ञानजंभिन्नं तस्मैपाणिनयेनमः॥ अज्ञानांधस्यलोकस्य ज्ञानांजनशलाकया॥ चक्षुरुन्मीलितंयेनतस्मैपाणिनयेनमः॥ त्रिनयनमभिमुखनिःसृतामिमांयइहपठेत्प्रयतश्चसदाद्विजः॥ सभवतिधनधान्यपशुपुत्रकीर्तिमानतुलंच सुखंसमश्नुतेदिवीतिदिवीति॥ ११॥ अथशिक्षामोदानश्वहकारं स्वराणांयथागीत्यर्चोस्यस्येदानंचापस्फूर्जंकरणेकादश॥ ॥१॥ इतिशिक्षासमाप्तः॥ शुभंभवतु॥

॥४॥

ॐम्॥ पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं॥ दिनर्त्वयनमासांगंप्रणम्यशिरसाशुचिः॥ प्रणम्यशिरसाकालमभिवाक्षरसंस्तुतं॥ कालज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः॥ विप्राणांसंमतेलोकेयज्ञकालार्थसिद्धये॥ निरेकंद्वादशाहर्द्वंद्विगुणंगतसंज्ञितं॥ षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते॥ स्वरार्कमेकेसोमार्कौयदाकंसोसवासवौ॥ स्यान्नंदाद्दियुगंमाघस्तपःशुक्लोदिनंसजः॥ १॥ प्रपद्यतेश्राविष्ठार्धेसूर्यो चांद्रमसावुदक्॥ सार्पार्द्धंदक्षिणार्कस्तुमाघःश्रावणयोःसदा॥ घर्मवृद्धिरपांप्रस्थःक्षपाह्रासउदग्गतौ॥ दक्षिणेतौविपर्यस्तौषण्मुहूर्त्ययनेनतु॥ द्विगुणांसप्तमंचाक्षंरयनाघंत्रयोदश॥ चतुर्थंदशमंचैवद्वियुग्मांबक्षेप्यतौ॥ वसुस्वष्टाभगोजश्वमित्रःसर्पाश्विनौजलं॥ धाताकश्चार्यमाघाश्चार्कपंचनभस्त्वतुः॥ भागाःस्युरष्टकाःकार्याःपक्षाद्वादश

चोक्ताः॥ एकादशगुणा स्यानः शुक्ले हृच्चैंदवा यदि॥२॥ कार्या भाज्याष्टका स्थाने कलाएकान्न
विंशतिः॥ ऊनस्था नेदिसप्तती कृ हृपेदृन संमिताः॥ त्र्यंशीभक्ता योदिवसांशा भागश्चतुर्द
शास्याप्युपनीतभिन्नं॥ भाद्यधिकेचाधिगतेपरंशो हावुन्मेकनवकैरवेधं॥ पक्षापंचद
शाचोर्ध्वंतऊनमितिनिर्दिशेत्॥ नवभिस्तूकृतोंशास्यादूनांशाद्यधिकेनतु॥ जोडुाद्यः
खेश्वेहीशोविन्मूषव्युःसोमाधानः॥ रेमध्राश्वाओजस्टष्टोहर्यक्षाइत्यक्षालिंगैः॥ जा
बाधंशैःसमंविद्यासूर्वीदंपार्वसूत्तरे॥ भादानांशांश्चतुर्दशीकाष्ठानोदेविनाकलाः॥३॥क
लादशाचविंशास्याद्दिमुहूर्तस्तुनाडिके॥ द्वित्रिंशत्सत्कलानांतुषट्शतीत्र्यधिकंभवेत्॥
नाडिकेद्वेमुहूर्तस्तुपंचाशत्पलमाषकं॥ माषकालुंभकोद्रोणःकुटपेर्वर्धतेत्रिभिः॥ ॥६॥
समसप्तकुंभयुक्स्योनः सूर्यायोनिंचयोदशा॥ नवभानिचपंचांशःकाष्ठाःपंचाश

शास्मृताः॥ श्रविष्ठाभ्यांगुणाभ्यस्ताश्चित्रान्विनिर्दिशेत्॥ सूर्यान्मासान्षडभ्यस्ता
न्विद्याच्चांद्रमसान्नरान्॥ अतीतपर्वभागेषुशोधयेद्दिगुणांतिथिं॥ तेषुमंडलभागेषुति
थिनिष्ठांगतोरविः॥४॥ याःपर्वभादानकलास्तासुसप्तगुणांतिथिं॥ प्रक्षिपेत्कलासमूहस्तु
विघाद्दानकीःकलाः॥ यदुत्तरस्यायनतोयनंस्याद्यंतुयद्दक्षिणतोयनस्य॥ तद्दिवष
स्याद्दिगुणंविभक्तंसहादशंस्याद्दिवसप्रमाणं॥ तदर्ददिनभागानांसदापर्वणिपर्वणि॥
ऋतुशेषंतुतद्दिघासंख्यायसहपर्वणां॥ इत्थंपायेसमुद्देशोभूयोप्येनंप्रकल्पयेत्॥
शेषराशिगताभ्यस्तान्विभजेत्तानराशिषु॥ अग्निःप्रजापतिःसोमोरुद्रोदितिर्बृहस्प
तिः॥ सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच॥ ५॥ सवितात्वष्टाथवायुश्चेंद्राग्नीमित्र

६॥ एवच॥ इंद्राग्नि रुद्रतिरापो वै विश्वेदेवास्तथैवच॥ विसुर्वसवोवरुणोजएकपात्तथैवच॥अहि
र्बुध्न्यस्तथापूषाश्विनौयमएवच॥नक्षत्रदेवताएताएताभिर्यज्ञकर्मणि॥ यजमानस्यरा
स्त्रेर्नमनक्षत्रजंस्मृतं॥ इत्येतन्मासवर्षाणांमुहूर्तोदयपर्वणां॥ दिनर्तुयनमासाग्र्या
ख्यातंतत्रगधोब्रवीत्॥ सोमसूर्यस्त्रिचरितोलोकांलोकेचसंमितं॥ सोमसूर्यस्त्रिचरि
तोवि हान्वेदविदभ्रुते॥ ६॥ विषुवंतद्रुणं ह्राभ्यां रूपहीनंतुषड्गुणं॥ यल्लभ्यंतानिपर्वाणि
तथोर्ध्वंसातिथिर्भवेत्॥ माघशुक्लप्रयत्नस्तुपोषरूक्षसमापिनः॥ युगस्यपंचवर्षा
णिकालज्ञानंप्रचक्षते॥ तृतीयानवमीचैवपौर्णमासीत्रयोदशी॥ षष्ठीचविषुनेप्रो ॥ ६॥
क्तो द्वादश्यांचसमंभवेत्॥ चतुर्दशीमुपवसथस्तथाभवेद्यथोदितोदिनमुपैतिचंद्रमा॥

माघशुक्लाद्विकोयुक्ते श्रविष्ठायांचवार्षिकी॥ यथाशिखामयूराणांनागानांमणयोय
था॥ तद्वेदांगशास्त्राणांज्योतिषंमूर्धनिस्थितं॥ वेदाहियज्ञार्थमभिप्रवृत्ताः कालानु
पूर्वीविहिताश्चयज्ञाः॥ तस्मादिदंकालविधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञान्योज्यो
तिषंवेदसवेदयज्ञानिति॥ ७॥ पंचसंवत्सरंप्रपद्येतेकार्याः कलादशचयाः पर्वसंधिताविषु
वंसप्त॥ ॐम्॥ मयरस्तजभनलगसंमितंभ्रमतिवाङ्मयंजगतियस्य॥ सजय
तिपिंगलनागःशिवप्रसादाद्विशुद्धमतिः॥ त्रिगुरुंविद्विभकारंलघ्वादिसमन्वितंय
काराख्यं॥ लघुमध्यमंतुरेफंसकारमंतेगुरुनिबद्धं॥ लघ्वंसहितकारंजकारमुभ
योर्लघुंविजानीयात्॥ आदिगुरुंचभकारंनकारमिहपैंगलेत्रिलघुं॥ दीर्घसंयोगपरंतथा

॥6॥ स्वरव्यंजनोत्तमूष्मांतं॥ सानुस्वारंचगुरुं कचिदवसानेपिलघ्वंत्यं॥आदिमध्यावसानेषुयरता
यांतिलाघवं॥भजसागौरवंयांतिमनौतुगुरुलाघवं॥विरामंदशवर्णषण्मात्रमुवाचर्षिं गतः स
त्रं॥छंदोवर्णपदार्थप्रत्ययहेतोश्चरणाख्या दो॥१॥श्रीश्रीस्त्री॥वरासाय॥कागुहार॥वसुधासू॥
सातेकत्॥कदासज्॥किंवदृभ्॥नहसन्॥गत्॥गंते॥आदिपरः॥हे॥लौसः॥ग्लेः॥अष्टोवसव
इति॥२॥छंदः॥गायत्री॥द्व्येकं॥आसुरीपंचदश॥प्राजापत्याष्टौ॥यजुषांषट्॥साम्नांहिः॥
ऋचांत्रिः॥द्वौद्वौसाम्नांवर्द्धत॥त्रीस्त्रीन्त्सांत॥चतुरश्चतुरःप्राजापत्यायाः॥एकैकंरोषे॥जघ्ना
दासुरी॥तान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः॥तिस्रस्तिस्रःसाम्न्यएकैकाब्राह्म्यः॥ ॥७॥
प्राग्यजुषामार्ष्यइति॥३॥पादः॥इयादिपूरणः॥गायत्र्यावसवः॥जगत्याआदित्याः॥विरा

जोदिशः॥त्रिष्टुभोरुद्राः॥एकाहित्रिचतुष्पादुक्तपादं॥आद्यंचतुष्पादृतुभिः॥क्वचित्त्रिपादृषिभिः॥
सापादनिवृत्॥षट्कसप्तकयोर्मध्येषोढातिपादनिवृत्॥द्वौनवकौषट्कश्चनाम॥विपरीता
वाराही॥षट्कसप्तकाष्टकैर्वर्धमाना॥विपरीताप्रतिष्ठा॥तृतीयंहिपाज्जागतगायत्रीभ्यां॥त्रि
पात्रैष्टुभैः॥उष्णिग्गायत्रीजागतश्च॥ककुंमध्येचेदंत्यः॥पुरउष्णिक्पुरः॥४॥पुरोष्णिक्पुरः॥
चतुष्पादृषिभिः॥अनुष्टुप्गायत्रैः॥त्रिपात्क्वचिज्जागताभ्यांच॥मध्येतोच॥बृहतीजागत
स्त्र्यश्चगायत्राः॥पथ्यापूर्वभ्रेस्तृतीयः॥न्यंकुसारिणीद्वितीयः॥स्कंधोग्रीवीक्रोष्टुकः॥उरो
बृहतीयास्कस्य॥उपरिष्टाद्बृहत्यंते॥पुरस्ताद्बृहतीपुरः॥क्वचिन्नवकाश्चत्वारः॥वैराजो
गायत्रीच॥त्रिभिर्जागतैर्महाबृहती॥सतोबृहतीतांडिनः॥पंक्तिर्जागतोगायत्रीच॥पूर्वैश्चे

दयुजोः सतः पंक्तिः॥ विपरीतौ च॥ आस्तारपंक्तिः पुरतः॥ ५॥ प्रस्तारपंक्तिः पुरतः॥ विस्तारपंक्ति
रंतः॥ संस्तारपंक्तिर्बहिः॥ अक्षरपंक्तिः पंचकाश्चत्वारः॥ द्वावप्यत्यष्टयः॥ पदपंक्तिः पंचा॥ च
तुष्पट्कौ त्रयश्च॥ पथ्यापंक्तिभिर्गायत्रैः॥ जगती षड्भिः॥ एकेन त्रिष्टुब्ज्योतिष्मती॥ तथा जग
ती॥ पुरस्ताज्ज्योतिः प्रथमेन॥ मध्येज्योतिर्मध्यमेन॥ उपरिष्टाज्ज्योतिरंत्येन॥ एकस्मिन्पंचकेछं
दःशंकुमती॥ षट्केककुप्मती॥ त्रिपादनिष्ठमध्यापथ्यालिकमध्या॥ विपरीतायवमध्या॥ ऊना
धिकेनैकेननिचृद्भुरिजौ॥ द्व्याद्यविराट्स्वराजौ॥ आदितः संदिग्धे॥ ६॥ देवतादितश्च॥ अग्निः स
विता सोमो बृहस्पतिर्मित्रावरुणाविंद्रोविश्वेदेवताः॥ स्वराः षड्जऋषभगांधारमध्यमपंचमधै
वतनिषादाः॥ सितसारंगपिंगलकृष्णनीललोहितगौरावर्णाः॥ आग्निवेश्यकाश्यपगौतमांगिर
सभार्गवकौशिकवासिष्ठानिगोत्राणि॥ ऋयामान्यतिछंदांसि॥ रोचनाभाः कृतयः॥ अनुक्तानां

वादे

॥८॥

कामतोवर्णाइति॥ ७॥ चतुःशतमुत्कृतिः॥ चतुर्श्चतुरस्यजेदुत्कृतेः॥ नान्यभिसंख्याप्रेभ्यः कृतिः॥
प्रकृत्याचोपसर्गवर्जितः॥ ऋष्यार्षिशकरीजगत्यः॥ एथकृथकृपूर्वतएतान्येषां॥ द्वितीयं
द्वितीयमतितः॥ अथलौकिकं॥ आत्रेष्टुभाचयदार्षं॥ पादश्चतुर्भागः॥ यथावृत्तसमाप्तिकी॥
लःसमुद्गणः॥ गौरंतमध्यादिर्लश्च॥ स्वराअर्चंचार्चाधीं॥ अत्रायुङ्नज्॥ षळोज्॥ न्लोवा॥
न्लोचेसदंद्वितीयादि॥ सप्तमःप्रथमादि॥ अंत्येपंचमः॥ ९॥ षळश्चल्॥ त्रिषुगणेषुपादःप
थ्याघेच॥ विपुलान्या॥ चपलाद्वितीयचतुर्थौङ्मध्येजौ॥ पूर्वेमुखपूर्वा॥ जघनपूर्वेतरत्र॥ उभयो
र्महाचपला॥ आचर्चसमागीतिः॥ अंत्येनोपगीतिः॥ उल्कामेषोद्गीतिः॥ अर्धेवसुगणाआर्यागी
तिः॥ वैतालीयंद्विःस्वराअयुक्पादेयुग्वसवोंतेलः॥ गोपच्छदसिकं॥ आपातलिकाभोगः॥ शे
षेपरेषायुङ्नसाकं॥ षट्चामिश्रायुजि॥ पंचमेनपूर्वःसाकंप्राच्यवृत्तिः॥ अयुक्तृतीयेनो

ष्टी च यतिः ॥ आर्भ्यां युगपत्प्रवृत्तकं ॥ अयुक्पादाकुलिकं ॥ ९ ॥ युगपदंतिका ॥ गंता द्विर्वसवोमात्रासमकलनवमः ॥ द्वादशाश्ववानवासिका ॥ विश्लोकः पंचमाष्टमौ ॥ चित्रानवमश्च परयुक्तेनोपचित्रा ॥ एभिः पादाकुलकं ॥ गीत्यार्यालः ॥ शिरवाविपर्यस्तार्धी ॥ लः पूर्वश्चेज्यो तिः ॥ गश्चेत्सोम्या ॥ चूलिकैकान त्रिंशदेकत्रिंशदंतेगः ॥ सान्येननसमालागलरति ॥ १० ॥ उत्तं ॥ समसर्धसमंविषमंच ॥ समंतावत्तत्रकृतमर्धसमंविषमंच ॥ राजयूनं ॥ ग्लितिसमानी ॥ ग्लितिप्रमाणी ॥ विलानमन्यत् ॥ पादस्यानुष्टुबलं ॥ नप्रथमात्स्रौ ॥ द्वितीयचतुर्थयोरश्व वान्यत् ॥ यच्चतुर्थात् ॥ पथ्यायुजोज् ॥ विपरीतेकीयं ॥ चपलायुजोन् ॥ विपुलायुग्लः सप्तमः ॥ सर्वतःसैतवस्य ॥ भ्रौनौच ॥ प्रतिपादंचतुर्ध्यापदचतुरूर्ध्वं ॥ गावंतआपीडः ॥ ११ ॥ गावा दौचेत्प्रत्यापीडः ॥ प्रत्यापीडोगावादौच ॥ प्रथमस्यविपर्यासेमंजरीलवल्यमतथाराः ॥ उ

॥ २ ॥

द्गतामेकतस्त्रौस्त्रौन्सौज्गौभ्नौज्त्रौग्स्त्रौस्त्रौग् ॥ तृतीयस्यसौरभकंनौभ्गौ ॥ ललितंनौस्त्रौ ॥ उप स्थितप्रचुपितंपथगाचम्सौज्भौगौस्त्रौज्त्रौग्नौस्त्रौन्जोय् ॥ वर्धमानंतृतीयेनौस्त्रौन्सौ ॥ शुद्ध विराड्ऋषभंत्र्याः ॥ अरे ॥ उपचित्रकंसौस्त्रौग्भौभ्नौग् ॥ द्रुतमध्याभौभ्गौग्न्जौज्यौ ॥ वेगव तीसौस्त्रौभौभ्नौग् ॥ भद्रविराट्त्रौगौम्सौज्नौग् ॥ केतुमतीस्त्रौस्त्रौभ्त्रौन्नौग् ॥ आख्यान कीतौज्गौग्स्त्रौज्त्रौग् ॥ विपरीताख्यानकीज्तौज्त्रौग्तौज्त्रौग् ॥ हरिणप्लुतासौस्त्रौग्म्भौभ्त्रौ ॥ अपरवक्त्रंनौर्लग्न्जौज्त्रौ ॥ पुष्पिताग्रानौर्यौन्जौज्त्रौग् ॥ १२ ॥ यवमतीजौर्जौर्ज्यौज्त्रौग् ॥ शि खरैकांनत्रिंदैरौकत्रिंशदंतेगः ॥ रंजामहत्यजीति ॥ १३ ॥ यतिर्विच्छेदः ॥ तनुमध्यासौ ॥ कुमा रललिताज्सौग् ॥ मापावकाक्रीडितकंभ्तौज्गौ ॥ चित्रपदाभौगौ ॥ विद्युन्मालामौगौ ॥ भु जगशिशुभृतानौम् ॥ हलमुरवीनौस्रौ ॥ शुद्धविराण्मसौज्गौ ॥ पणवोम्नौयूगौ ॥ रुक्म

वतीभ्मोस्गो॥ मयूरसारिणीजौगौ॥ मत्ताभ्मौस्गो॥ उपस्थितात्जौजगौ॥ एकरूपंसोज्गौग॥
इंद्रवज्रातौजगौग॥ उपेंद्रवज्राज्तौजगौग॥ वाचंतानुपजातयः॥ दोधकंभौभ्गौग॥ शालिनी
म्तौतौग्स मुद्रऋषयः॥ १४॥ वातोर्मिर्म्तौत्गौग्च॥ भ्रमरविलसितंभ्मौन्लौग॥ रथोद्धता
नौर्लगि॥ स्वागतानौभ्गौग॥ द्रुतानौस्गौग॥ इयंनीर्जौर्लगि॥ जगती॥ वंशस्थाज्तौज्गौ॥ इं
द्रवंशातौज्गौ॥ द्रुतविलंबितंभ्नौभ्रौ॥ तोटकंसः॥ पुटोनौम्यौवसुसमुद्राः॥ जलोद्धतगति
र्ज्सौज्सौरसर्तवः॥ भुजंगप्रयातंयः॥ स्त्रग्विणीरः॥ प्रमिताक्षरास्त्रौसौ॥ वैश्वदेवीमोयाविंद्रि
यऋषयः॥ नवमालिनीन्नौभ्यावितिः॥ १५॥ प्रहर्षिणीम्तोज्गौग्त्रिकदशकौ॥ कुचिराज्भौ
स्त्रौग्रसमुद्रनवकौ॥ मत्तमयूराम्तोय्सौग्॥ असंबाधाम्तोन्सौगाविंद्रियनवकौ॥ अप
राजितानोसैर्लगौस्वरऋषयः॥ प्रहरणाकलितानोभ्तोन्लौच॥ वसंततिलकात्भौजौगौ॥

सिंहोन्नताकाश्यपस्य॥ उद्धर्षिणीसैतवस्य॥ चंद्रावतीनौनौस्॥ मालतुनवकौचेत॥ मणिगु
णनिकरोबस्रषयः॥ मालिनीनौम्यौय्च॥ ऋषभगजाविलसितंभ्नौनौम्गौस्वरनवकौ॥ हरि
णीन्सौम्रोस्लौग्रसरसमुद्रऋषयः॥ पृथ्वीज्सौज्सौय्लौग्वसुनवकौ॥ वंशपत्रपतितंभ्नौभौ
न्लौग्दिग्रषयः॥ मंदाक्रांताम्भौन्तौत्यौग्समुद्रर्तुस्वराः॥ शिखरिणीयमान्सौभ्लौग्रुद्रु
द्राः॥ कुसुमितलतावेल्लितान्तोन्यौयाविंद्रियर्तुस्वराः॥ १६॥ शार्दूलविक्रीडितम्सौज्सौतौ
गादित्यऋषयः॥ सुवदनाम्नोभ्नौयभौन्लौस्वरऋषिरसाः॥ श्लिष्टविरतं॥ स्रग्धरामोभ्नौभ्नौग्
यौयत्रिःसप्तकाः॥ शुमदकंभ्नौन्नौन्नौन्गोदिगादित्याः॥ अश्वललितंज्भौभ्जौभ्जौभ्लौ
ग्रुद्रादित्याः॥ मत्ताक्रीडामोत्तोनोन्लौग्वसुपंचदशकौ॥ तन्वीभ्तौन्सौमौन्यौहरादि
त्याः॥ क्रौंचपदाभ्मौस्मौनौनौग्भूतेंद्रियवस्रषयः॥ भुजंगविजृंभितंमोत्तोनौसौन्लौ

वसुरुद्रऋषयः॥ अपवाहकोम्नोनौनौन्सोगौनवकर्तुरसेंद्रियापि॥ दंडकोनोरः॥ प्रथम
श्चेदुत्थिप्रयातः॥ अन्यत्रराजभाड्याभ्यां॥ शेषः प्राचितइति॥१७॥ अत्रानुक्तंगाथा॥ हिकौ
रलौ॥ मिश्रौच॥ एथग्लामिश्राः॥ वसवस्त्रिकाः॥ लघौ॥ सैकेऽग्॥ प्रतिलोमगुणंहिर्लाघ्यं॥ त
लोग्यंकंजघ्रात्॥ हिरर्धे॥ रुद्रेभ्यून्यं॥ हिःशून्ये॥ तावदर्धेनऽणितं॥ हिर्ह्रूनं॥ तदंतानां॥ एकोने
ह्रा॥ परेपूर्णेपरेपूर्णमिति॥१८॥ मयहादराधीःपंचदशाछंदःषोडशपादःपरोल्लकुत्रस्ता
रपंक्तिविंशतिर्विंशतिरेकविंशतिर्देवताहिनोसौचतुःशतंषष्ठोविंशतिर्विंशतिर्युगपरांतिकाच्या
दशादत्तंगावोदोविंशतिर्विंशतिर्यवमतीत्रीणियतिर्विंशतिर्वातोर्मरमणदशाप्रहर्षिणीविंश
तिःशार्दूलविक्रीडितंपंचदशाचानुक्तंसप्तदशाष्टादशा॥ ॥१॥ छंदःसमाप्तः॥

MEMORIAL

ऊर्म्॥ गौः॥ गमा॥ ज्मा॥ क्ष्मा॥ क्षा॥ क्षमा॥ क्षोणी॥ क्षितिः॥ अवनिः॥ उर्वी॥ पृथ्वी॥ मही॥ क्षितिः॥ अ
दितिः॥ इला॥ निर्ऋतिः॥ भूः॥ भूमिः॥ पृथा॥ गातुः॥ गोत्रेऽेकविंशतिः पृथिवीनामधेयानि॥१॥
हेम॥ चूडं॥ रुक्मं॥ अर्यः॥ हिरण्यं॥ पेशः॥ रूरुनं॥ लोहं॥ कनकं॥ कांचनं॥ भर्म॥ अम्रतं॥ मरु
त्॥ दत्रं॥ जातरूपानितिपंचदशहिरण्यनामानि॥२॥ अंबरं॥ वियत्॥ व्योम॥ बर्हिः॥ धन्व॥
अंतरिक्षं॥ आकाशं॥ आपः॥ पृथिवी॥ भूः॥ स्वयंभूः॥ अब्धी॥ पुष्करं॥ सरः॥ समुद्रः॥ अब्ध
रभितिषोडशांतरिक्षनामानि॥३॥ स्वः॥ एभिः॥ नाकः॥ द्यौः॥ त्रिष्टप्॥ नभस्तियद्साध्या
रणानि॥४॥ रवेर्दयः॥ किरणाः॥ गावः॥ रश्मयः॥ अभीशवः॥ दीधितयः॥ गभस्तयः॥ वनं॥
उस्राः॥ वसवः॥ मरीचिपाः॥ मयूखाः॥ सप्तऋषयः॥ साध्याः॥ सुपर्णारतिपंचदशार
श्मिनामानि॥५॥ आतोः॥ आशोः॥ उर्वराः॥ आशाः॥ काष्ठाः॥ व्योम॥ ककुभः॥ हरितः

त्यशैरिङ्नामानि ॥६॥ रया वी ॥ शपा ॥ शर्वरी ॥ अक्तुः ॥ दुर्म्या ॥ रात्र्या ॥ यम्या ॥ नम्या ॥ दोषा ॥
नक्तं ॥ तमः ॥ रजः ॥ अर्सिक्नी ॥ पर्यस्वती ॥ तमस्वती ॥ घृताची ॥ शारिणा ॥ मोक्षी ॥ शोकी ॥
ऊधः ॥ पयः ॥ हिमा ॥ वस्वीत्रयोविंशतिरात्रिनामानि ॥ ७ ॥ विभावरी ॥ सूनरी ॥ भास्व
ती ॥ ओदती ॥ चित्रामघा ॥ अर्जुनी ॥ गाजिनी ॥ गाजिनीवती ॥ सुभगावरी ॥ अहना ॥ घोतना ॥ श्वेत्या ॥ अरुषी ॥ सूनृता ॥ सूनृतावती ॥ सूनृतावरीतिषोडशरोषोनामानि ॥ ८ ॥ वस्तोः ॥ घुः ॥
भानुः ॥ वासरं ॥ रुसराणि ॥ घ्रंसः ॥ घुमैः ॥ घृणः ॥ दिनं ॥ दिवा ॥ दिवेदिवे ॥ घविद्यवीति हादशाहर्नामानि ॥ ९ ॥ अद्रिः ॥ ग्रावा ॥ गोत्रः ॥ वलः ॥ अश्मा ॥ पुरुभोजाः ॥ वालिखानः ॥ अश्मा ॥ ॥१२२॥
पर्वतः ॥ गिरिः ॥ व्रजः ॥ चुरः ॥ वृद्राहः ॥ शंबरः ॥ रोहिणः ॥ रेवतः ॥ फुलिंगः ॥ उपरः ॥ उपलः ॥

चमसः ॥ अहिः ॥ अभ्रं ॥ वलाहकः ॥ मेघः ॥ दृतिः ॥ ओदनः ॥ वर्षाधिः ॥ वृत्रः ॥ असुरः ॥ कोशः
इतित्रिंशन्मेघनामानि ॥ १० ॥ अकेवः ॥ धारा ॥ इला ॥ गौः ॥ गौरी ॥ गांधर्वः ॥ गभीरा ॥ गंभीरा ॥
मंडा ॥ मंडाजनी ॥ वाशी ॥ वाणी ॥ वाणीची ॥ वाणः ॥ षविः ॥ भारती ॥ धुमनिः ॥ नाडी ॥ मेढिः ॥
मेना ॥ सूर्या ॥ सरस्वती ॥ निवित् ॥ स्वाहा ॥ वृत्नुः ॥ उपाब्दिः ॥ मायुः ॥ काकुत् ॥ जिह्वा ॥ घोषः ॥
स्वरः ॥ शब्दः ॥ स्वनः ॥ ऋक् ॥ होत्रा ॥ गीः ॥ गाथा ॥ गणः ॥ धेना ॥ गाः ॥ विपा ॥ नाना ॥ कशा ॥
पिषपा ॥ नाः ॥ अक्षरं ॥ मही ॥ अदितिः ॥ राची ॥ वाक् ॥ अनुष्टुप् ॥ धेनुः ॥ वृत्नुः ॥ गल्दा ॥
स्वरः ॥ सुपर्णः ॥ वेकुरेतिसप्तपंचाशद्धाङ्नामानि ॥ ११ ॥ अर्णः ॥ क्षोदः ॥ सरः ॥ नभः ॥
अंभः ॥ कबंधं ॥ सलिलं ॥ वाः ॥ वनं ॥ घृतं ॥ मधु ॥ पुरीषं ॥ पिप्पलं ॥ क्षीरं ॥ विषं ॥ रेतः ॥ कृतं ॥
जन्म ॥ बर्हणं ॥ बुसं ॥ तुग्र्या ॥ बर्हिः ॥ सुक्षेमं ॥ धनं ॥ सुरा ॥ अरिष्टानि ॥ ध्वस्मन्वत् ॥

जामि॥आयुधानि॥सर्पः॥अहिः॥अस्रं॥स्रोतः॥तृप्तिः॥रसः॥उदकं॥पयः॥सरः॥भेषजं॥
सहः॥सवः॥यहुः॥ओजः॥सुखं॥क्षुधं॥आर्द्रया॥भुवं॥यादुः॥भूतं॥भुवनं॥भविष्यत्॥आ
पः॥महत्॥व्योम॥यज्ञः॥महः॥सप्तकं॥स्रवंतीकं॥सुतीनं॥गहनं॥गभीरं॥गुभरं॥ईः॥अन्नं॥
हविः॥सत्यं॥सदनं॥ऋतं॥योनिः॥ऋतस्ययोनिः॥सत्यं॥नीरं॥रयिः॥सत्॥पूर्णं॥सर्वं॥अ
क्षितं॥बर्हिः॥नाम॥सर्पिः॥अपः॥पवित्रं॥अमृतं॥इंदुः॥हेम॥स्वः॥सर्गः॥शं वरं॥अर्घं॥
वपुः॥अंबु॥तोयं॥तूयं॥रुपीरं॥शुक्रं॥तेजः॥स्वधा॥वारि॥जलं॥जलाशयं॥इरमित्येकरात्रमु
दकनामानि॥१२॥अवनयः॥युष्याः॥स्वाः॥सीराः॥स्रोत्याः॥एन्यः॥धुनयः॥ऊजानाः॥वृष्ण्
यः॥स्वादोअर्णाः॥रोधचक्राः॥हरितः॥सरितः॥अयुवः॥नप्तुनः॥वृध्वः॥हिरण्यवर्णाः॥
रोहितः॥सुस्रुतः॥अर्णाः॥सिंधवः॥कुल्याः॥वर्याः॥उर्व्याः॥इरावत्यः॥पार्वत्यः॥स्रवंत्यः॥

॥१३॥

ऊर्जस्वत्यः॥पयस्वत्यः॥तरस्वत्यः॥सरस्वत्यः॥हरस्वत्यः॥रोधस्वत्यः॥भारत्यः॥अजिरः॥मात
रः॥नद्य इतिसप्तत्रिंशन्नदीनामानि॥१३॥अश्वः॥हयः॥अर्वा॥वाजी॥सप्तिः॥वह्निः॥दधिक्राः॥
दधिक्रावा॥एतग्वः॥एतशः॥पैरुः॥दौर्गृहः॥औच्चैश्रवसः॥तार्क्ष्यः॥आशुः॥नृभ्रः॥अरुषः॥
मांश्वत्यः॥अव्यथयः॥श्येनासः॥सुपर्णाः॥पतंगाः॥नरः॥हार्यश्वाः॥हंसासः॥अश्वा इतिष
ड्विंशतिरश्वनामानि॥१४॥हरीइंद्रस्य॥रोहितोग्नेः॥हरितआदित्यस्य॥रासभावश्विनोः॥
अजाःपूष्णः॥एषवोमरुतां॥अरुण्योगावउषसां॥रयावाःसवितुः॥विश्वरूपाबृहस्पतेः॥
नियुतोवायोरितद्रुद्रादिशोपयोजनानि॥१५॥भ्राजते॥भ्राशते॥भ्राजयति॥दीदयति॥शो
चति॥मंदते॥भंदते॥रोचते॥द्योतते॥द्योतते॥घुमदिसेकादशज्वलतिकर्मणः॥१६॥
जमत्॥कल्मलीकिनं॥जंजणाभवत्॥मल्मलाभवत्॥अर्चिः॥शोचिः॥तपः॥तेजः॥हरः॥

दृणिः॥शृंगाणिशृंगाणीत्येकादशजलतोनामधेयानि॥१७॥गोहेमांबरंस्वः॥खेदयआतापःस्वा
वीदिभावरीश्वस्तारद्विःश्लोकार्णोवनयोसोहरिद्रुस्यत्राजतेजमदितिसप्तदश॥इतिनिघं
टेप्रथमोध्यायः॥ॐम्॥अर्पः॥अन्नः॥दंसः॥वेषः॥वेषः॥वृष्टी॥व्रतं॥कर्वरं॥कुरूपं॥शकम्॥
ऋतुः॥कर्त्वानि॥करोसि॥करिक्रत्॥करंती॥चक्रत्॥कर्त्रं॥कर्तीः॥कृतवै॥कृतं॥धीः॥
राट्॥रामी॥शिमी॥शक्तिः॥शित्यामितिषड्विंशतिः कर्मनामानि॥१॥तुक्॥तोकं॥तनयः॥
तोकम्॥तकम्॥शेवं॥अन्नं॥गयः॥जाः॥अपत्यं॥यडुः॥सूनुः॥नपात्॥प्रजः॥बीजमितिपंच
दशापत्यनामानि॥२॥मनुष्याः॥नरः॥धवाः॥जंतवः॥विशः॥क्षितयः॥कृष्टयः॥चर्षणयः॥
नडुषः॥हरयः॥मर्याः॥मर्त्याः॥मर्ताः॥ब्राताः॥तुर्वशाः॥द्रुह्यवः॥आयवः॥यदवः॥अनवः॥ ॥१८॥
पूरवः॥जगतः॥तस्थुषः॥पंचजनाः॥विश्वेतः॥एतनाइतिपंचविंशतिर्मनुष्यनामानि॥३॥

आयुतीः॥च्यवनाः॥अभीशूः॥अश्वसानाः॥विनंगसः॥गभस्तीः॥करस्नः॥बाहुः॥भुरिजौ॥शि
पंस्तीः॥राकरीः॥भरित्रेतिद्वादशबाहुनामानि॥४॥अयुवः॥अण्व्यः॥शिप्रः॥ब्रिशः॥शयीः॥
रश्नाः॥पीतयः॥अथुर्यः॥विपः॥कृष्यः॥अवनयः॥हरितः॥स्वसारः॥जामयः॥सनाभयः॥
योक्त्राणि॥योजनानि॥धुरः॥शाखाः॥अभीशवः॥दीधितयः॥गभस्तयइतिद्वाविंशतिरं
गुलिनामानि॥५॥बर्हिः॥उशमसि॥वेति॥वेनति॥वेसति॥वांछति॥वष्टि॥वृनोति॥जुषते॥
हर्यति॥आर्चके॥ऊर्णोति॥मन्यते॥छेसत्॥चकनत्॥चकमानः॥कनति॥कानिषदित्यष्ट
दशकांतिकर्मणि॥६॥अंधः॥वाजः॥पयः॥श्रवः॥एधः॥पितुः॥सुतः॥सिनं॥अवः॥इळ॥धा
सिः॥इरा॥इळा॥इषः॥ऊर्क्॥रसः॥स्वधा॥अर्कः॥क्षयः॥नमः॥सुसं॥नमः॥आयुः॥सू
नृता॥ब्रह्म॥वर्चः॥कीलालं॥यज्ञइत्यष्टाविंशतिरन्ननामानि॥७॥आवयति॥भवति॥ब

भ्रस्ति॥ वेति॥ वेवेष्टि॥ अविष्णन्॥ वप्सति॥ भ्रस्थः॥ बृध्यं॥ कृरतीति दशानिकर्माणः॥८॥ ओ
जः॥ पाजः॥ शवः॥ तवः॥ तरः॥ वरः॥ राधः॥ बाधः॥ नृम्णं॥ नविष्ठः॥ शुष्मं॥ शुरः॥ दक्षः॥ वी
ळु॥ चोलं॥ शूषं॥ सहः॥ यहः॥ वधः॥ वर्गः॥ वृजनं॥ टक्॥ मज्मना॥ पौंस्यानि॥ धृणिसिः॥ इ
विणं॥ स्पृधासः॥ शंबरभिष्यदाभिः॥ नतिबलनामानि॥ ९॥ मृधं॥ रेक्णः॥ रिक्थं॥ वेदः॥ वरिवः॥
शुत्रं॥ रत्नं॥ रयिः॥ धुत्रं॥ भगः॥ मीळ्हं॥ गयः॥ घुम्नं॥ दृढियं॥ वसु॥ सयः॥ राधः॥ भोज
नं॥ तना॥ नृम्णं॥ बंधुः॥ मेधा॥ यज्ञः॥ द्रविणं॥ श्रवः॥ दत्रं॥ दतसिष्यदाभिः॥ धनना मानि॥१०॥ अघ्न्या॥ उस्त्रा॥ उस्त्रियाः॥ अहीः॥ महीः॥ अदितिः॥ इळा॥ जगती॥ रा करी
तिनवगोनामानि॥११॥ रेळते॥ हेळते॥ भामते॥ भृणीयते॥ भीषाति॥ भ्रेषति॥ दोधति॥ ॥१५॥
वनुष्यति॥ कंपते॥ भोजत इति दशाकुध्यतिकर्माणः॥१२॥ हेळः॥ हरः॥ हणिः॥ यजः॥ भामः॥

एहः॥ क्रुधः॥ तपुषी॥ जूर्णिः॥ मन्युः॥ व्यथिरिसेकादशाक्रोधनामानि॥१३॥ वर्तते॥ अर्यते॥ क्रोटते॥
लोठते॥ स्यंदते॥ कसति॥ सर्पति॥ स्यमति॥ स्रवति॥ स्रंसते॥ अर्वति॥ श्वोवति॥ ध्वंसति॥ वे
नति॥ माष्टि॥ भुरण्यति॥ रावति॥ कालयति॥ पेलयति॥ कंटति॥ पिस्यति॥ विस्यति॥ मिस्यति॥
प्रवते॥ हवते॥ च्यवते॥ कवते॥ गवते॥ नवते॥ शोदति॥ नक्षति॥ सक्षति॥ म्यक्षति॥ सचति॥ ऋ
छति॥ तुरीयति॥ चतति॥ अतति॥ गाति॥ इयर्ति॥ सश्चति॥ स्वरति॥ रंहति॥ यतते॥ भ्रमति॥
भ्रजति॥ रजति॥ लजति॥ क्षियति॥ धमति॥ मिनाति॥ ऋणवति॥ ऋणोति॥ स्वरति॥ सिसर्ति॥
वेविष्टि॥ चोषिष्टि॥ रिणाति॥ रीयते॥ रेजति॥ दृंयति॥ दम्नोति॥ युध्यति॥ धन्वति॥ अर्कषति॥
आर्यति॥ दीयते॥ तर्कति॥ दीयति॥ ईषति॥ फणति॥ हनति॥ अदति॥ मदति॥ सस्रते॥ नर्स
ते॥ हर्यति॥ इर्यर्ति॥ ईर्ते॥ ईरयते॥ ज्रयति॥ श्वात्रति॥ गंति॥ आगनीगंति॥ जंगंति॥ जिन्वति॥

अर्सति॥ गर्मति॥ भ्रति॥ भ्राति॥ भ्रयति॥ वहते॥ रथ्यति॥ जेहते॥ घःकति॥ कंपति॥ प्साति॥ वा
ति॥ याति॥ इषति॥ इति॥ इळति॥ एजति॥ जर्मति॥ जर्वति॥ वंचति॥ अनति॥ पर्वते॥ हंति॥ से
धति॥ अगन्॥ अजगन्॥ जिगाति॥ पतति॥ इन्वति॥ इर्मति॥ इर्वति॥ वेति॥ हर्यतात्॥ एति॥
अगायात्॥ अयुयुरिति द्वाविंशंरातंगतिकर्माणः॥१४॥ नु॥ मुक्ष॥ इवत्॥ ओषं॥ जीराः॥ जूर्णिः॥
शूर्ताः॥ शूघनासः॥ रीभं॥ त्वषु॥ तूर्य॥ तूर्णिः॥ अजिरं॥ भूरण्युः॥ शु॥ आशु॥ प्राशुः॥ तूतु
जिः॥ तूतुजानः॥ तुज्यमानासः॥ अञ्जीः॥ सार्वीनित्॥ घृगत्॥ ताजत्॥ तूरणिः॥ वातरंहाइति
षड्विंशतिःक्षिप्रनामानि॥१५॥ तूळित्॥ आसात्॥ अंबरं॥ तूर्नशे॥ अस्तमीके॥ आके॥ उपाके॥
अर्वाके॥ अंतमानां॥ अवमे॥ उपमइत्येकादशांतिकनामानि॥१६॥ रर्णः॥ विवाक्॥ विदुवा
दः॥ नदनुः॥ भरे॥ आक्रंदे॥ आहवे॥ आजौ॥ पृतनाज्यं॥ अभीके॥ समीके॥ समसत्यं॥

नेमधिता॥ संकाः॥ सामितिः॥ समनं॥ मीळ्हे॥ एतनाः॥ स्पर्धः॥ मर्धः॥ एरुक्॥ समस्क॥ सम
र्ये॥ समरणे॥ समोहे॥ समिथे॥ संख्ये॥ संगे॥ संयुगे॥ संगाथे॥ संगमे॥ दुवस्यं॥ एक्षे॥ आ
क्षे॥ शूरसाते॥ वाजसाते॥ सुसनीके॥ रवते॥ रवजे॥ पौंस्ये॥ महाधने॥ वाजे॥ अज्मे॥ सर्म॥
संयत्॥ संवत इतिषट्चत्वारिंशत्संग्रामनामानि॥१७॥ इन्वति॥ नक्षति॥ आप्नोणः॥ आर्न
ट्॥ आशे॥ आपानः॥ अश्नात्॥ नशत्॥ आनशे॥ आश्नुत इतिद्वाव्याप्तिकर्माणः॥१८॥ दू
ष्नोति॥ श्नथति॥ च्नथति॥ च्नथते॥ दूणाति॥ दूश्नुते॥ कुणबति॥ कुंतति॥ श्वसिति॥ नर्मत॥
अर्दयति॥ स्रपणति॥ स्नेहयति॥ यातयति॥ स्फुरति॥ स्फुलति॥ निर्वपतु॥ अवतिरति॥ वि
यौति॥ आतिरत्॥ नाळित्॥ आखंडल॥ दूणाति॥ रम्णाति॥ श्रथ्नाति॥ रम्नाति॥ दूणोक्षि॥
नाक्षि॥ नितोशते॥ निबर्हयति॥ मिनाति॥ मिनोति॥ धमतीति त्रयस्त्रिंशद्धकर्माणः॥१९॥

दिद्युत्॥ नेमिः॥ हेतिः॥ नमः॥ पविः॥ स्रुकः॥ टकः॥ वधः॥ वज्रः॥ अर्कः॥ कुलिशः॥ कुलिशः॥ तुजः॥
तिग्मः॥ मेनिः॥ स्वधितिः॥ सायकः॥ परश्वधि स्वष्टदशावज्रनामानि॥ २०॥ इरज्यति॥ पस्त्यते॥ क्षय
ति॥ राजतीति चत्वारऐश्वर्यकर्मणः॥ २१॥ राष्ट्री॥ अर्यः॥ नियुत्वान्॥ इन इन इति चत्वारीश्व
रनामानि॥ २२॥ अपस्कृ उ मनुष्या आयुरयु १ ग्रुवोवरम्यु आवयु योजोमघमेघ्या रळतेहे
वोवर्तेनुतळिडपा इन्वतिदीधेतिदिद्युदिरज्यतिराष्ट्री द्वाविंशतिः॥ इतिनिघंटेहितीयोध्यायः॥
ॐम्॥ उरु॥ तुवि॥ पुरु॥ भूरि॥ राध्यत्॥ विश्वा॥ परीणसा॥ व्यानशिः॥ रातं॥ सहस्रं॥ साकिलं॥
कुविदिति द्वादशबहुनामानि॥ १॥ ऋहत्॥ क्रुस्वः॥ निघ्नः॥ मायुकः॥ प्रतिष्ठा॥ क्रुधुः॥ वृन्त्र
कः॥ दभ्रं॥ अर्भकः॥ क्षुल्लकः॥ अल्प इत्येकादश क्रुस्वनामानि॥ २॥ महत्॥ नभ्राः॥ ऋषः॥ ॥१७॥
बृहत्॥ उक्षितः॥ तूवरेः॥ तुविषः॥ महिषः॥ अर्भवः॥ ऋभुक्षाः॥ उक्षा॥ विहायाः॥ युवः॥

वृक्षथ॥ विवंससे॥ अंभृणः॥ माहिनः॥ गभीरः॥ कुकुहः॥ रभसः॥ आचन्॥ विरप्शी॥
अद्भुतं॥ बर्हिषः॥ बर्हिषदितिपंचविंशतिर्महन्नामानि॥ ३॥ गयः॥ कुदरः॥ गर्तः॥ हर्म्यं॥
अस्तं॥ पस्त्यं॥ दुरोणे॥ नीडं॥ दुर्याः॥ स्वसराणि॥ अमा॥ दमे॥ क्षत्रिः॥ योनिः॥ सधा॥
शरणं॥ वरूथं॥ छदिः॥ छदिः॥ छाया॥ शर्म॥ अज्मेति द्वाविंशतिर्गृहनामानि॥ ४॥
इरज्यति॥ बिधेर्म॥ सपर्यति॥ नमस्यति॥ दुवस्यति॥ ऋभोति॥ ऋणोति॥ ऋचति॥
सपति॥ विवासतीतिदशपरिचरणकर्मणः॥ ५॥ शिंशाती॥ शातयै॥ शातपंता॥ शि
न्वुः॥ स्यूमकं॥ रोदस्यं॥ मर्यः॥ सुग्म्यं॥ सुदिनं॥ भूषं॥ शूनं॥ शर्म॥ भेषजं॥
जत्राषं॥ स्योनं॥ सुम्नं॥ रोवं॥ शिवं॥ रं॥ कमितिविंशतिःसुखनामानि॥ ६॥ निर्णिक्॥

वज्रिः॥वर्चः॥वपुः॥अमतिः॥अप्सः॥पक्वः॥अन्नः॥पिशः॥पेशः॥दक्षनः॥मरुतः॥अर्जुनः॥
नाम्नः॥अतृषः॥शित्यमितिषोडशरूपनामानि॥७॥अत्तेमा॥अनेमा॥अनेघः॥अनव-
घः॥अनभिशस्यः॥उक्थ्यः॥सुनीथः॥पाकः॥वामः॥वयुनमितिदशप्रज्ञास्यनामानि
॥८॥केतुः॥केतः॥चेतः॥चित्तं॥क्रतुः॥असुः॥धीः॥शची॥माया॥वयुनं॥अभिख्येते
कादशप्रज्ञानामानि॥९॥बट्॥श्रत्॥सत्या॥अद्धा॥इत्था॥ऋतमितिषट्सत्यनामानि
॥१०॥चिक्यतुः॥चाकनत्॥अचेश्म॥चक्रे॥विचक्रे॥विचर्षणिः॥विश्वचर्षणिः॥अवचा
कशदित्यष्टौपश्यतिकर्मणः॥११॥हिकं॥नुकं॥सुकं॥आहिकं॥आकं॥नकिः॥मा ॥१८॥
किः॥नकिं॥आऋतमितिनवोत्तराणिपदानिसर्वपदसमाम्नानाय॥१२॥इदमिव॥

इदंयथा॥अग्निर्नेत्रे॥चतुरश्रिरुदंमानात्॥ब्राह्मणाव्रतचारिणः॥दक्षस्यनुतेपुरुहूत
वृत्राः॥जारआभगं॥मेषोभूतोरेभियन्नयं॥तदृषः॥तदृणं॥तदृतं॥तथरूपमाः॥१३॥
अर्चति॥गायति॥रेभति॥स्तोभति॥गूर्धयति॥गुणाति॥जरते॥हूयते॥नदति॥पृच्छ
ति॥रिहाति॥धमति॥कृपायति॥कृपण्यति॥पूनस्यति॥पुनायते॥वल्गूयति॥मंदते॥भं
दते॥छंदति॥छदयति॥रारमानः॥रंजयति॥रजयति॥रंसति॥स्तोति॥योति॥रोति॥
नोति॥भनति॥पणायति॥पणते॥सर्पति॥पुप्क्षाः॥मृहयति॥नाजयति॥पूजयति॥मन्य
ते॥मंदति॥रसति॥स्तरति॥वेनति॥मंदयति॥जल्पतीतिचतुश्चत्वारिंशदर्चतिकर्मणः
॥१४॥विप्रः॥विप्रः॥गृत्सः॥धीरः॥वेनः॥वेधाः॥कपर्वः॥ऋभुः॥नर्यः॥कविः॥मनीषी॥

॥१९॥ मेधाता॥विधाता॥विपः॥मनश्चित्॥विपश्चित्॥विपन्यवः॥आकेनिपः॥उरिजः॥कीस्तासः॥
अङ्गानयः॥सुतयः॥सुतुथाः॥वाघतरतिचतुर्विंशति मेधाविनामानि॥१८॥रेभः॥अरि
नाः॥कारुः॥नृदः॥स्तामुः॥कीरिः॥गोः॥सूरिः॥नादः॥छंदः॥स्कंपू॥कुदः॥रूपण्युरितित्रयो
दशस्तोतृनामानि॥१९॥यतः॥वेनः॥अध्वरः॥मेधः॥विदथः॥नार्यः॥सवनं॥होत्रा॥इ
षिः॥रेभतांता॥मरवः॥विप्लुः॥इंदुः॥प्रजापतिः॥घर्मरतिपंचदशयज्ञनामानि॥१७॥मे
दुराः॥कुरवः॥वाघतः॥वृक्तबर्हिषः॥यतस्रुचः॥मरुतः॥सुवार्धः॥देवयव इत्यष्टाव
त्विङ्नामानि॥१८॥ईमहे॥यामि॥मन्महे॥दद्मि॥याम्नि॥पूर्धि॥मिमिदि॥मीमिहि॥
रिरिदि॥रिरीहि॥पीपरत्॥युतारः॥यंधि॥इषुध्यति॥मदेमहि॥मनामहे॥माय
तरतिसप्तदशर्त्विग्याज्यानामानि॥१९॥दाति॥दासति॥राति॥रासति॥ ॥१९॥

॥

प्रक्षि॥प्रणाति॥शिक्षति॥तुंजति॥मंहतइतिदशदानकर्मणः॥२०॥परिस्रव॥पर्यस्र
अर्षेति॥आशिषइतिचत्वारोध्येषणाकर्मणः॥२१॥स्वपिति॥सस्तीतिद्वौस्वपितिकर्मणो
॥२२॥कूपः॥कातुः॥कर्तः॥तूप्रः॥काटः॥खातः॥अयनः॥त्रिविः॥सूदः॥उत्सः॥ऋज्रयदात्॥
क्षारोतरात्॥कुशयः॥केवटइतिचतुर्दशपल्वलनामानि॥२३॥तपुः॥तक्वा॥रिभ्वा॥रिपुः॥
रिक्वा॥रिहोयाः॥तायुः॥तस्करः॥वनर्गुः॥कूरश्चित्॥सुषीवान्॥मलिम्लुचः॥अघशंसः॥
दृक इतिचतुर्दशचौरस्यनामानि॥२४॥निण्यं॥सस्वः॥सनुतः॥हिरक्॥प्रतीच्यं॥अपी
च्यमितिषण्णिपणीतांतर्हितनामधेयानि॥२५॥आके॥पुराके॥पुराचैः॥आरे॥पराव
तरतिपंचदशनामानि॥२६॥प्रत्नं॥प्रदिवः॥प्रवयाः॥सनेमि॥पूर्व्यं॥अद्ग्रायेतिषट्
पुराणानामानि॥२७॥वेन॥नूत्नं॥नूतनं॥नव्यं॥इदा॥इदानीमितिषळेतनवनामा

॥२०॥

नि॥२८॥प्रपिते॥अभीके॥दक्षे॥अर्भके॥तिरः॥सतः॥वः॥नेमः॥ऋक्षाः॥स्वाभिः॥वृन्दी
भिः॥उपजिह्वका॥उदरं॥रुदरं॥रुधः॥पिनाकं॥मेना॥मनाः॥रोपः॥वेतसः॥अया॥एना॥
सिषक्ति॥सचते॥अयसते॥रेजत॥तिषड्डिः॥तिहिराउत्तराणिनामानि॥२९॥स्वधे॥पुरंध्री॥
विषणौ॥रोदसी॥क्षोणी॥अंभसी॥नभसी॥रजसी॥सदसी॥सधनी॥घृतवती॥बहु
ले॥गभीरे॥गंभीरे॥औषये॥चम्वौ॥पार्श्वौ॥मही॥उर्वी॥पृथ्वी॥अदितौ॥अही॥दूरे
अंते॥अपारे अपारे इति चतुर्विंशतिर्घोषाएथिव्योनामधेयानि॥३०॥उर्वीरुन्मह
ऊर्यइरुयतिरिंबातोनिर्णिगस्त्रेमाकेतुर्बृहच्चक्यदिकेमिदमिवाचेतिविप्रोरि
भोयुतोभरतेईमेहेतिपरिस्रवरचेतिकूपेस्रपुर्निण्यमाकेप्रलंनवंप्रपि ॥२०॥
वेस्वधेत्रिंशत्॥१॥ ॥इतिनिघंटवतीयोध्यायः॥शुभंभवतु॥छ॥छ॥

ॐम्॥जहा॥निधा॥शितोमा॥सेहतो॥दमूनाः॥मृषः॥इषिरेण॥कुरुतनं॥जठरं॥
तितउ॥शिप्रे॥मध्या॥संदृ॥ईमीतासः॥कायमानः॥लोधं॥शीरं॥विदुधे॥उपदे॥
तुग्वनि॥नंसते॥नसतः॥ओहनसः॥अयसत॥इषिणः॥बाहः॥परिनंस्या॥सुवि
ते॥दयते॥नूचित्॥नूचे॥सुवने॥अकूपारस्य॥शिशीते॥सुतुकः॥सुप्रायणाः॥अ
प्रायुवः॥च्यवनः॥रजः॥हरः॥जुहूरे॥यंतः॥कृपाः॥जाती॥विषुणः॥जाभिः॥पि
तां॥संयोः॥अदितिः॥एदिरे॥अस्थिरः॥जरते॥मंदिने॥गौः॥गातुः॥देसयः॥तृता
धा॥चयसे॥वियुते॥ऋधक्॥अस्याः॥अस्येतिद्वाविंशतिपदानि॥१॥सस्मिन्॥बा
हिकः॥दूतः॥बावशानः॥नार्यः॥अंधः॥असश्चंती॥वनुष्यति॥तरुष्यति॥भंदनाः॥

आहनः॥ नृदः॥ सोमोअसाः॥ श्चात्रं॥ कुतिः॥ हासमाने॥ पृङिः॥ सुसं॥ दृता॥ ब्राः॥ ब्रह्मः॥ स्वर्सरणि॥ रार्यः॥ अर्कः॥ पृषिः॥ वर्षः॥ धन्वः॥ सिनः॥ इथा॥ सचः॥ चित्॥ आ॥ द्युम्नं॥ पवित्रं॥ तोदः॥ सचः॥ शिपिविष्टः॥ विष्णुः॥ आष्टनिः॥ पृथुज्रयाः॥ अथर्युः॥ काणुकः॥ अश्विनुः॥ अंगिरसः॥ आपीतमन्युः॥ रमशः॥ उर्वशी॥ वयुनं॥ वाजप्रस्य॥ वाजगंध्यं॥ गाध्यं॥ गाधिता॥ कौरयाणः॥ तौरयाणः॥ अर्यायाणः॥ हरयाणः॥ औदि॥ तः॥ बंदी॥ निःषपी॥ तूणिः॥ स्थूपं॥ निचुंपुणः॥ पदिः॥ पादुः॥ दकः॥ जोषयाकं॥ कनिः॥ श्वघ्नी॥ समस्य॥ कुटस्य॥ चर्षणिः॥ रांबः॥ केवयः॥ तनूमाकवे॥ अंसत्रं॥ काकुदं॥ बीरिट॥ अर्च॥ परि॥ ईं॥ स्त्री॥ एनं॥ एनो॥ स्रुणिरिति चतुरुत्तरमशीतिः पदानि॥२॥

॥२१॥

आशुशुक्षणिः॥ आशोभ्यः॥ काशिः॥ कुणारुं॥ अत्यत्नः॥ सलिलुकं॥ कुसुरुं॥ विस्फुलिंगः॥ वीरुधः॥ नक्षद्राभं॥ अस्थूरयोयुः॥ निष्टुभाः॥ दुवस्वत्यं॥ ऋदूदरः॥ ऋदूपे॥ पुरुकामः॥ असिन्वती॥ कृपणा॥ भारद्वाजीकः॥ कुजानाः॥ जूर्णिः॥ ओमनः॥ उपलप्रक्षिणी॥ उपस्तिः॥ प्रकल्पितः॥ अभ्यावर्तिनः॥ ईक्षे॥ क्षोणस्य॥ अस्मे॥ पाथः॥ सवीमनि॥ सुप्रथाः॥ विदथानि॥ श्रायंतः॥ आत्रीः॥ अत्रीगः॥ अमूरः॥ राजामनः॥ देवोदेवानांरूपा॥ विजोमातुः॥ ओमासः॥ सोमानं॥ अनवायं॥ किमीदिनं॥ अमीवान्॥ अमीवा॥ दुरितं॥ अघा॥ अमतिः॥ श्रुष्टी॥ पुरंधिः॥ रुशंतं॥ रिशादसः॥ सुदत्रः॥ सुविदत्रः॥ आनुषक्॥ तुर्वणिः॥ गिर्वणसे॥ अस्मेनस्मै॥ अस्मयुक्॥

यारश्मिन्॥जारयायि॥अग्रिया॥वनः॥पनुता॥शुरुधः॥अभिनः॥जस्सतीः॥अप्र
तिष्कुतः॥शाशदानः॥सप्रः॥सुशिप्रः॥शिप्रे॥रंसु॥हिबर्हाः॥अत्कः॥उरणः॥स्तियो
नां॥स्तिपाः॥जबारः॥जरूथं॥कुलिशः॥तुजः॥बृहणा॥ततनुष्टिं॥इलीबिरः॥कियेधाः॥
अमिः॥विष्पितः॥तुरीषं॥रास्पिनः॥ऋंजतिः॥ऋजुनीती॥प्रतद्वसू॥हिनोतं॥चोकूया
मानः॥चोकूयते॥सुमत्॥दिविष्टिषु॥दूतः॥जिन्वति॥अमंत्रः॥ऋचीषमः॥अनेशी
रातिं॥अनर्वा॥असोमि॥गर्दभया॥जल्हवः॥वकुरः॥बेकुनाटान्॥अभिधेतन॥
अंकुरः॥बुतः॥वाताप्यं॥चाकन्॥रथर्यति॥असंक्रां॥आध्वः॥अनवब्रुवः॥

सदान्ने॥शिरिंविठः॥पुरारारः॥क्रिविर्दती॥करूकती॥दनः॥शारारः॥इदंयुः॥कीकटेषु॥बुंदः॥इं
दः॥किः॥उल्बं॥ऋचीसमचीसमितित्रयस्त्रिंशदुत्तरपदानि॥३॥जुहासस्त्रिमाशुशुक्षाणिस्त्री
णि॥इतिनिघंटे-चतुर्थोध्यायः॥ओम्॥अग्निः॥जातवेदाः॥वैश्वानरइतित्रीणिपदानि॥१॥इ
विर्णोदः॥इध्मः॥तनूनपात्॥नराशंसः॥इडः॥बर्हिः॥द्वारः॥उषासानक्ता॥दैव्याहोतारा॥
तिस्रोदेवीः॥त्वष्टा॥वनस्पतिः॥स्वाहाकृतयइतित्रयोदशपदानि॥२॥अश्वः॥शकुनिः॥
मंडूकः॥अशाः॥ग्रावाणः॥नराशंसः॥रथः॥दुंदुभिः॥इषुधिः॥हस्तघ्नः॥अभीशवः॥
धनुः॥ज्या॥इषुः॥अश्वाजनी॥उलूखलं॥वृषभः॥दुघणः॥पितुः॥नपः॥आपः॥ओष
धयः॥रात्रिः॥अरण्यानी॥श्रद्धा॥एथिवी॥अद्वा॥अग्नायी॥उलूखलमुसले॥हवि

र्धानें॥ द्यावापृथिवी॥ विष्णुरुरुगाय॥ आत्मा॥ भुवनस्य रेतो॥ देवीर्जोषौ॥ देवी ऊर्जाहुती तिषट्
त्रिंशत्पदानि॥ ३॥ वायुः॥ वरुणः॥ रुद्रः॥ इंद्रः॥ पर्जन्यः॥ बृहस्पतिः॥ ब्रह्मणस्पतिः॥ क्षेत्र
स्यपतिः॥ वास्तोष्पतिः॥ वाचस्पतिः॥ अपांनपात्॥ यमः॥ मित्रः॥ कः॥ सरस्वान्॥ विश्वक
र्मा॥ तार्क्ष्यः॥ मन्युः॥ दधिक्राः॥ सविता॥ त्वष्टा॥ वातः॥ अग्निः॥ वेनः॥ असुनीतिः॥ ऋतः॥
इंदुः॥ प्रजापतिः॥ अहिः॥ अहिर्बुध्न्यः॥ सुपर्णः॥ पुरूरवाइति द्वात्रिंशत्पदानि॥ ४॥ श्येनः॥
सोमः॥ चंद्रमाः॥ मृत्युः॥ वैश्वानरः॥ धाता॥ विधाता॥ मरुतः॥ रुद्राः॥ ऋभवः॥ अंगि
रसः॥ पितरः॥ अथर्वाणः॥ भृगवः॥ आप्त्याः॥ अदितिः॥ सरमा॥ सरस्वती॥ वाक्॥ अनु
मतिः॥ राका॥ सिनीवाली॥ कुहूः॥ यमी॥ उर्वशी॥ पृथिवी॥ इंद्राणी॥ गौरी॥ गौः॥ धेनुः॥ ॥२३॥

अद्भ्यः॥ पृथ्वी॥ स्वस्तः॥ उषाः॥ इळा॥ रेवतीति षट्त्रिंशत्पदानि॥ ५॥ अश्विनौ॥ उषाः॥ सूर्या॥
उषाकुपायी॥ सरण्यूः॥ त्वष्टा॥ सविता॥ भगः॥ सूर्यः॥ पूषा॥ विष्णुः॥ विश्वानरः॥ वरुणः॥ कै
रवी॥ कैरातिः॥ उषाकपिः॥ यमः॥ अजएकपात्॥ पृथिवी॥ समुद्रः॥ अथर्वा॥ दध्यङ्॥ मनुः॥ आ
दित्याः॥ सप्तऋषयः॥ देवाः॥ विश्वेदेवाः॥ साध्याः॥ वसवः॥ वाजिनः॥ देवपत्न्यो देवपत्न्यइत्ये
कत्रिंशत्पदानि॥ ६॥ अग्निरिंद्रविष्णूरुद्राअश्विनोवायुःश्येनोश्विनौषट्॥ इतिनिधृवपंचमो
ध्यायः॥ रा के १६ ८९॥ सर्वजित्नामसंवत्सरे कार्तिकबहुत्रयोदशीतद्दिनि इदंपुस्त
कंसमाप्तं॥ श्री॥ रा॥ म॰ज॥य॥ रा॥ म॥ज॥य॥जय॥रा॥ म॥ श्री॥ छ॥ छ॥ छ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इति शिक्षा चतुष्टयः समाप्तः ॥